# प्रथमः पाठः
# प्रयाणगीतम्

PS15P6

चन्दनतुल्या भारतभूमिस्तपस्थली ग्रामो ग्रामः।
बाला–बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः।
मन्दिरवत् पावनं शरीरं
सर्वो मानव उपकारी।
सिंहा इह खेलनका जाता
गौरिह पूज्या जनयित्री।।
इह प्रभाते शङ्खध्वनिः सायं सङ्गीतस्वान्।
बाला–बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः।। (1)
अत्र कर्मतो भाग्यनिर्मितिः
पौरुषनिष्ठा कल्याणी।
अत्र त्यागतपस्या मिश्रा
गाथा गायति कविवाणी।।
अत्र ज्ञानप्रवाहो गङ्गासलिलनिर्मलो हयविरामः।
बाला बाला देवीप्रतिमा वत्सो वत्सः श्रीरामः।। (2)
अत्रत्यैः सैनिकैः समरभुवि
सदा गीयते श्रीगीता।
अत्र क्षेत्रे हलफालाधः
खेलति सुकुमारी सीता।।
अत्र जीवनादर्शे जटितो मङ्गलमयमणिरभिरामः।
बाला बाला देवी प्रतिमा वत्सो वत्सः श्रीरामः।। (3)

## शब्दार्थाः

चन्दनतुल्या = चन्दन के समान। प्रतिमा = मूर्ति। वत्सो–वत्सः = बच्चा–बच्चा। मन्दिरवत् = मन्दिर के समान। सिंहा = सिंह। इह = यहां। खेलनकाः = खिलौने। जनयित्री = माता। इह प्रभाते = इस सुबह में। स्वान् = शब्द। कर्मतो = कर्म से। भाग्यनिर्मितः = भाग्य से बना। अत्र = यहाँ। गायति = गाती है। अत्र ज्ञानप्रवाहो = यहाँ ज्ञान की धारा। गङ्गासलिलनिर्मलो = पवित्र गंगा का जल। अत्रत्यैः सैनिकैः = यहाँ सैनिकों द्वारा। सदागीयते = हमेशा गाई जाती है। अत्रक्षेत्रे = यहाँ क्षेत्र में। हलफालाधः = हल के फल के नीचे। खेलति = खेलती है। सुकुमारी सीता= कोमलांगी सीता। जीवनादर्शे = जीवन आदर्श में। मङ्गलमयमणिरभिरामः = मंगल (सुख) मणि की तरह सुन्दर।

## अभ्यासः

**प्रश्न 1. निम्नलिखित का संस्कृत में उत्तर दीजिए –**

(क) अस्माकं भारतभूमिः कीदृशी अस्ति ?

(ख) अत्र भारते गौः किं मन्यते ?

(ग) अत्रत्यैः सैनिकैः समरभुवि किं गीयते ?

(घ) अत्र जीवनादर्शे किं जटितम् ?

**प्रश्न 2. रिक्त स्थानों की पूर्ति कीजिए –**

(क) सिंहा इह ........................ सन्ति।

(ख) अत्र कर्मतः ............................ भवति।

(ग) अत्र क्षेत्रे सुकुमारी सीता ............।

(घ) अत्र ............ मङ्गलमयमणिः जटितः।

**प्रश्न 3. निम्नलिखित का संस्कृत में अनुवाद कीजिए –**

(क) भारत भूमि का बच्चा–बच्चा श्रीराम है।

(ख) यहाँ प्रभात में शंखध्वनि होती है।

(ग) यहाँ कविवाणी त्याग तपस्यामय गाथाएं गाती है।

(घ) इस क्षेत्र में सुकुमारी सीता खेला करती हैं।

**प्रश्न 4. (क) निम्न पदों की सन्धि कीजिए –**

(1) मानव + उपकारी। (2) कर्मतः + भाग्यनिर्मितिः।

**(ख) सन्धि विच्छेद कीजिए–**

(1) ह्यविरामः। (2) मणिरभिरामः।

**प्रश्न 5. निम्नलिखित का उत्तर दीजिए –**

(क) 'जनयित्री' शब्द का पुल्लिङ्ग बताइये।

(ख) 'गाथा' शब्द की द्वितीया विभक्ति तथा वचन बताइये।

(ग) 'सैनिकैः' पद में शब्द तथा वचन बताइये।

**विशेष –** इस रचना को कण्ठस्थ करके लयसहित सुनाइये।

PS36N9

❖❖❖